"गवेधुका तु विद्वद्भिर्गवेधुः कथिता स्त्रियाम् ।
गवेधुः कटुका स्वाद्वी कार्श्यकृत् कफनाशिनी ॥"
इति भावप्रकाशः ॥)

गवेधुकं, क्ली, (गवेधुरिव कायतीति । कै + कः । गैरिकम् । इति राजनिर्घण्टः ॥ (तृणधान्यविशेषः । गड़गड़ि इति भाषा ॥ यथा,—
"चिल्लीलट्वाकलोणीका कुरुण्टकगवेधुकम् ।"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥
सर्पविशेषे पुं । यथा, सुश्रुते कल्पस्थाने ४ अध्याये ।
"महासर्पः शृङ्गपाली लोहिताक्षो गवेधुकः परिसर्पः" इत्यादयः ॥)

गवेधुका, स्त्री, (गवेधु + स्वार्थे संज्ञायां वा कन् ।) तृणधान्यविशेषः । गड़गड़ देधान इति च भाषा । (यथा, विष्णुपुराणे । १ । ६ । २५ ।
"श्यामाकास्त्वथ नीवारा जर्त्तिलाः सगवेधुकाः ।")
तत्पर्य्यायः । गवेडुः २ । इत्यमरः । २ । ९ । ५२ ॥ गवेधुः ३ गवेडुका ४ । इति तट्टीका ॥ क्षुद्रा ५ गोजिह्वा ६ गुन्द्रा ७ गुत्यः ८ । इति रत्नमाला ॥ नागबला । इति राजनिर्घण्टः ॥ (अस्याः पर्य्याया यथा,—
"गाङ्गेरुकी नागबला झषा ह्रस्वगवेधुका ।
खरयष्टिरिका विश्वदेवा गोरक्षतण्डुली ॥"
इति च वैद्यकरत्नमालायाम् ॥)

गवेरुकं, क्ली, (गां भूमिमीर्त्ते उत्पत्तिकारणत्वेन प्राप्नोतीति । गो + ईर् + बाहुलकादुक । ततोऽवङादेशः ।) गैरिकम् । इति त्रिकाण्डशेषः ॥

गवेशका, स्त्री, (ईष्टे इति । ईश + अच । ततो गवामीशः । स इव कायतीति । कै + कः ।) वृक्षविशेषः । इति शब्दचन्द्रिका ॥ गोरक्ष चाउलिया । इति भाषा ॥ (गुणादयोऽस्या गोरक्षतण्डुलाशब्दे ज्ञातव्याः ॥)

गवेष, त् क मार्गणे । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) मूर्द्धन्योपधः । अजगवेषत् गुणं गुणी । इति दुर्गादासः ॥

गवेषणा, स्त्री, क्ली, (गवेष + भावे युच् ।) अन्वेषणा । इत्यमरः । १ । ७ । ३२ ॥

गवेषितं, त्रि, (गवेष्यते स्म इति । गवेष + क्त ।) अन्वेषितम् । इत्यमरः । ३ । १ । १०५ ॥

गवोद्भवः, पुं. उत्पलभेदः । गोमूत्रः प्रशस्तः । इति व्युत्पत्तिः ॥

गव्यं, त्रि, (गोरिदं गोर्विकारो वा । "गोपयसोर्यत् ।" ४ । ३ । १६० । इति यत् । "वान्तो यि प्रत्यये ।" ६।१।७९ । इति अव् ।) गवां सर्व्वम् । गोसम्बन्धि । तत्तु दुग्धगोमयादि । इत्यमरः । २ । ९ । ५० ॥ (यथा, मनुः । ३।७१ ।
"संवत्सरन्तु गव्येन पयसा पायसेन च ॥")
गोहितम् । इति मेदिनी । ये । १७ ॥

गव्यं, क्ली, (गवि वाणे साधु । गो + यत् । ततोऽव् ।) ज्या । (गवि नेत्रे साधु इति ।) रोचनम् । इति मेदिनी । ये । १७ ॥

गव्या, स्त्री, (गवां समूहः । "खलगोरथात् ।" ४ । २ । ५० । इति यत् । "वान्तो यि प्रत्यये ।" ६ । १ । ७९ । इति अव् ।) गोसमूहः । तत्पर्य्यायः । गोत्रा २ । इत्यमरः । २ । ९ । ६० ॥ गव्यूतिः । (गवि इषौ साधुः । गो + यत् । ततष्टाप् ।) ज्या । इति हेमचन्द्रः ॥ गोरोचना । इति राजनिर्घण्टः ॥

गव्यूतं, क्ली, (गोर्य्यूतिः । "गोर्य्यूतौ छन्दस्युपसंख्यानम् ।" "अध्वपरिमाणे च ।" ६ । १ । ७९ । इत्यस्य वार्त्तिं इति अव् । पृषोदरात् इकारलोपे साधुः ।) क्रोशः । गव्यूतिः । इति हेमचन्द्रः । ३ । ५५१ ॥

गव्यूतिः, स्त्री, पुं, (गोर्य्यूतिः । "गोर्य्यूतौ छन्दस्युपसंख्यानम् ।" "अध्वपरिमाणे च ।" ६ । १ । ७९ । इत्यस्य वार्त्तिं इति अव् ।) द्विसहस्रधनुः । इति शब्दार्णवः ॥ क्रोशद्वयम् । (यथा, राजतरङ्गिण्याम् । ३ । ४०९ ।
"गव्यूतिमात्रमासन्ने देवीधामनि धैर्य्यवान् ।
धुन्वन् कराभ्यां मधुपान् धावति स्म स धीरधीः ॥")
तत्पर्य्यायः । क्रोशयुगम् २ । इत्यमरः । २ । १ । १८ ॥ गव्यूतम् ३ गोरुतम् ४ गोमतम् ५ । इति भरतधृतवाचस्पतिः ॥ गव्या ६ । इति हेमचन्द्रः । ३ । ५५२ ॥

गह, त् क गहने । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) गहनं दुर्ब्बोधः । गहयति शास्त्रं जड़धीः । दुःखेन जानातीत्यर्थः । इति दुर्गादासः ॥

गहनं, क्ली, (गाह्यते दुर्गम्यतेऽस्मिन्निति । गाह् + बहुलमन्यत्रापि इति युच् लघ्नगहनयोरिति निर्द्देशात् वा ह्रस्वः । यद्वा, गह त् क गहने + ल्युट् ।) वनम् । इत्यमरः । २ । ४ । १ ॥ (यथा, गोः रामायणे । ६ । ९ । ६ ।
"सखीभिर्देव तन्वीक मया सर्व्वं प्रकम्पितम् ।
निलीय गहने शून्ये भयत्रस्ता च रावणात् ॥")
गह्वरम् । दुःखम् । इति मेदिनी । ने । ५७ ॥ (पुं, विष्णुः । दुर्ज्ञेयत्वादस्य तथात्वम् । यथा, महाभारते । १३ । १४९ । ५४ ।
"करणं कारणं कर्त्ता विकर्त्ता गहनो गुहः ।"
"सर्व्वरूपं सामर्थ्यं चेष्टितं तस्य ज्ञातुं न शक्यते इति गहनः ।" इति भाष्यम् ॥)

गहनः, त्रि, (गाह्यते दुःखेन गम्यते इति । गाह् + युच् । लघ्नगहनयोरिति निर्द्देशात् वा ह्रस्वः ।) दुर्गमः । दुष्प्रवेशः । तत्पर्य्यायः । कलिलः २ । इत्यमरः । २ । ४ । १ ॥ (यथा, रामायणे । ३ । १ । २३ ।
"गहनेष्वाश्रमान्तेषु लीलाविक्रतदर्शनाः ।
रमन्ते तापसांस्तत्र नाशयन्तः सुदारुणाः ॥")

गहना, स्त्री, अलङ्कारः । इति देवीपुराणम् ॥

गह्वरं, क्ली, (गाह्यते इति । गाह् + "छित्वरछत्वरेति ।" उणां । ३ । १ । इति वरच्प्रत्ययेन निपातनात् साधुः ।) गुहा । (यथा, रघुः । २ । २६ ।
"गङ्गाप्रपातान्तविरूढ़शष्पं
गौरीगुरोर्गह्वरमाविवेश ॥") ॥
गाह्यते विलुड्यते आलाडनेन इति ।) दम्भः । इत्यमरः । २ । ३ । ६ ॥ वनम् । इति मेदिनी । रे । १४९ ॥ रोदनम् । इति हेमचन्द्रः । ६ । ३८ ॥ (गहने त्रि । यथा, भागवते । १ । ६ । १३ ।
"नलवेणुशरस्तम्बकुशकीचकगह्वरम् ।
एक एवातियातोऽहमद्राक्षं विपिनं महत् ॥")

गह्वरः, पुं, (गाह्यते विलुड्यते इति । गाह् विलोडने + "छित्वरछत्वरेति ।" उणां । ३ । १ । इति वरच्प्रत्ययेन निपातनात् साधुः ।) निकुञ्जः । इति मेदिनी । रे । १४९ ॥

गह्वरी, स्त्री, (गह्वर + स्त्रियां ङीप् ।) गुहा । इति शब्दरत्नावली ॥

गा, ङ गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ङ, गाते । इति दुर्गादासः ॥

गा, र लि स्तुतौ । अजनि । इति कविकल्पद्रुमः ॥ (ह्वां-परं-सकं-सेट् ।) र, वैदिकः । लि, जगाति । इति दुर्गादासः ॥

गा, स्त्री, (जगाति स्तौति अनया । गा स्तुतौ + क्विप् ।) गाथा । इति पुरुषोत्तमः ॥

गाङ्गं, त्रि, (गङ्गाया इदमिति अण् ।) गङ्गासम्भूतम् । इति मेदिनी ॥ गे । ५ ॥ (यथा, कुमारे । ५ । ३७ ।
"विकीर्णसप्तर्षिबलिप्रहासिभि-
स्तथा न गाङ्गैः सलिलैर्दिवश्च्युतैः ॥"
मेघधाराविनिःसृते जलविशेषे, क्ली । तल्लक्षणादिकं यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये ।
"तत्रान्तरीक्षं चतुर्व्विधम् । तद्यथा, धारं कारं तौषारं हैममिति । तेषां धारं प्रधानं लघुत्वात् । तत्पुनर्द्विविधं गाङ्गं सामुद्रञ्चेति । तत्र गाङ्गमाश्वयुजे मासि प्रायशो वर्षति तयोर्द्वयोरपि परीक्षणं कुर्व्वीत शाल्योदनपिण्डमकुथितमविदग्धं रजतभाजनोपहितं वर्षति देवे बहिष्कुर्व्वीत स यदि मुहूर्त्तं स्थितस्तादृश एव भवति तदा गाङ्गं पततीत्यवगन्तव्यं वर्णान्यत्वे सिक्थक्लेदे च सामुद्रमिति विद्यात्तन्नोपादेयम् । सामुद्रमप्याश्वयुजे मासि गृहीतं गाङ्गवद् भवतीति ॥"
अस्य परीक्षा यथा,—
"गाङ्ग सामुद्रविज्ञानं कथयिष्यामि साम्प्रतम् ।
धारितं येन पात्रेण लक्ष्यते येन तद्विधम् ॥
धौतं शुद्धं सितं वस्त्रं चतुर्हस्तप्रमाणकम् ।
दत्त्वाथ हस्तांश्च चतुश्चतुष्कोणेषु बन्धयेत् ।
तस्मात् परीक्षते तोयं शुद्धे रौप्यमयेऽथवा ॥
कांस्यपात्रे समुद्धृत्य परीक्षेत भिषग्वरः ।
शुद्धकुम्भी स तत्रस्था श्वेतशाल्योदनस्य वा ॥
पिण्डिका तत्र संक्षिप्ता नान्यथा भाति सा पुनः ।
श्वेता च निर्म्मला पिण्डी शुद्धञ्च विमलं पयः ॥
तद्गाङ्गं सर्व्वदोषघ्नं गृहीत्वा हि शुभाजने ।
तद्धारयेच्च मतिमान् बल्यं मेध्यं रसायनम् ॥
श्रमक्लमपिपासाघ्नं कफदोषनिवारणम् ।
लघु [illegible]
गाङ्गोदकस्य वृष्टिः स्यादिवसे [illegible]
इति हारीते प्रथमे स्थाने [illegible]